प्रकृतिपुरुषकृतम् स्तोत्रम्।
श्रीमुद्गलपुराण खंड १-६(३१-४८)
श्रीगणेशाय नमः।
प्रकृतिपुरुषावूचतुः ।
नमस्ते गणनाथाय स्वसंवेद्यमयाय ते ।
निराकारस्वरूपा वै शुंडा यस्य विराजते ॥३१॥
यस्य देहश्च साकारः कंठाधः परिकथ्यते ।
अभेद एतयोर्जातस्तेन त्वं वै गजानन ॥३२॥
चतुविधं निजानंदाद्वेदेषु कंथिनं भवेत् ।
एकमव्यक्तरूपं च द्वितीयं समरूपकम् ॥३३॥
तृतीयं सत्स्वरूपं च चतुर्थं यत्सदा ह्यसत् ।
चतुर्हस्तस्वरूपं ते तेन त्वं वै चतुर्भुजः ॥३४॥
तवोदरे स्थितं सर्वं तेन लंबोदरः स्मृतः ।
मायामायिकरूपं च द्वौ पादौ द्विविधं च ते ॥३५॥
एते सर्वे गणा ढुंढे त्वदीया नात्र संशयः ।
गणनाथोऽसि तेन त्वं नाम्ना ख्यातश्च सर्वदा ॥३६॥
एतादृशो निजात्मासावावयोर्ध्यान आयभौ ।
स्वसंवेद्यतया ध्यातो भक्तानुग्रहकारकः ॥३७॥
भक्ताभिमानभावेन देहधारी स्वयं ह्यभूत् ।
एतैश्च लक्षणैर्युक्तो गणेशो नामधारकः ॥३८॥
धन्यं सर्वं कृतं स्वामिन् येन त्वं देहवानभूः ।
स्वानंदवासभृत् साक्षाद् हृदि नित्यं स्थिरो भव ॥३९॥
नमस्ते विघ्नराजाय नमस्ते विघ्नहारिणे ।
भक्तानां वै ह्यभक्तानां विघ्नकर्त्रे नमोऽस्तु ते ॥४०॥
कर्मणां फलदात्रे च ज्ञानानां सिद्धिदायिने ।
अमेयशक्तये तुभ्यं सर्वाधाराय ते नमः ॥४१॥
किं कर्तव्यं दयासिंधो तदेवाज्ञापय प्रभो ।
तव भक्तिं महातीव्रां देहि नौ गणनायक ॥४२॥
एवं स्तुतिं समाकर्ण्य परितुष्टो गणाधिपः ।
मेघगंभीरया वाचा हर्षयन्नन्ब्रवीत्तदा ॥४३॥
श्रीगणेश उवाच ।
साधु साधु महाभागौ यदुक्तं स्तोत्रमुत्तमम् ।
मम प्रीतिकरं सर्वकामदं प्रभविष्यति ॥४४॥
धर्मार्थकाममोक्षाणां दायकं पुष्टिवर्धनम्।
कारागृहस्थितानां च मोचकं लक्षपाठतः ॥४५॥
मारणोच्चाटनादीनां नाशकं तत्तथैव च ।
एकविंशनिवारं यः एकविंशद्दिनावधि ॥४६॥
पठेत्तु यदि वै भक्त्या ईप्सितफलं लभेत् ।
ब्रह्मभूयकरं चैतन्निष्कामपठनाद्भवेत् ॥४७॥
भवतोस्तपमा तुष्टः स्तोत्रेणानेन भावतः ।
प्रीतो दास्यामि संपूर्ण भवद्भ्यामीप्सितं च यत् ॥४८॥
इति श्रीमुद्गलपुराणे प्रकृतिपुरुषकृतम् स्तोत्रम् संपूर्णम्।

M002 प्रकृतिपुरुषकृत स्तोत्र. १-६ (३९-५६)
श्रीमुद्गलपुराण मराठी ओवीबद्ध - डॉ. सी. ग. देसाई
|| ॐ श्रीगणेशाय नमः ||
त्वं पद तत् पद रूपें वर्णित । प्रकृति पुरुष प्रसन्नचित्त ।
गणनाथा तुज प्रणाम अविरत । स्वयंवेद्या निराकार ॥३९॥
कंठाखालीं ज्याचा देह । गजरूपी साकार निःसंदेह ।
कंठावरचा निराकार स्वदेह । म्हणोनि म्हणती गजानन ॥४०॥
चतुर्विध निजानंद वेदोक्त । शिव विष्णु सूर्यशक्ति रूप असत ।
प्रथम अव्यक्त रूप असत । समरूपक अन्य असे ॥४१॥
तिसरें ते सत्स्वरूप म्हणती । चवथें तें तुरीय जाणती ।
चार हात तुझे विलसती । रहस्य तेथ हेंचि असे ॥४२॥
पहिलें तें शिवाचें रूप । दुसरें विष्णुचें स्वरूप ।
तिसरें असे सौररूप । शक्तिरूपी चतुर्थ तें॥४३॥
तुझ्या उदरीं सर्व स्थित । म्हणोनि लंबोदर प्रख्यात ।
माया मायिक चरण असत । गणनाथा तुझे जगीं ॥४४॥
ढुंढे हे सर्व तुझे गण असत । म्हणोनी गणनाथ तूं विराजत ।
आमुच्या आत्मस्वरूपांत । ध्यानीं अनुभविला तुला ॥४५॥
भक्तांवरी कृपा करिशी । भक्ताभिमान तू बाळगिशी ।
म्हणोनि देह धारण करिशी । ऐशा लक्षणें युक्त जो ॥४६॥
गणेशा स्वामि धन्य केलें । तूं देहरूप जैं धारण केलें ।
स्वानंदवासा मम हृदयीं झालें । नित्य स्थिर तुझें रूप ॥४७॥
विघ्नराजा तुला नमस्कार । विघ्नहर्त्या नमस्कार ।
अभक्तांना विघ्नकर । ऐशा तुला नमो नमः॥४८॥
कर्मांचे फल तूं देशी । ज्ञानांची सिद्धी पावविसी ।
अमेयशक्ति तू अससी । सर्वाधीशा तुला नमस्कार ॥४९॥
दयासिंधो काय करावें । तें सत्वरी सांगावें ।
महातीव्र भक्तियुक्त असावें । आम्हीं ऐसें करी सदा॥५०॥
ऐसी स्तुती ऐकून । गणाधिप मनीं संतोषून ।
मेघगंभीर बोले वचन । आनंद वाटे तयांना॥५१॥
अति सुंदर स्तोत्र उत्तम । गाऊन प्रसन्न चित्त मम ।
केलें म्हणोनी सर्व काम । पुरतील हे वाचोनिया ॥५२॥
धर्म अर्थ काम मोक्ष देईल । पुष्टीचें वर्धन करील ।
कारागृहीं जे असतील । सुटतील ते लक्ष पाठें॥५३॥
मारण उच्चाटणादींचे भय । नष्ट होईल निःसंशय ।
एकवीस वेळां जो भक्तिमय । वाचील एकवीस दिवसांतरी ॥५४॥
भक्तिपूर्वक वाचील । इष्ट काम त्या लाभेल ।
ब्रह्मरूप तो होईल । निष्कामचित्तें वाचितां ॥५५॥
तुमच्या या स्तवनें संतुष्ट । झालों आता मागा इष्ट ।
तपाचरणें दूर झालें अनिष्ट । देईन मागाल तें तुम्हां॥५६॥
इति श्रीमुद्गलपुराणे प्रकृतिपुरुषकृतम् स्तोत्रम् संपूर्णम्।